# Matangini Kavacham

# मातङ्गिनीकवचम्

## Document Information

Text title : mAtanginIkavacham 1

File name : mAtanginIkavacham.itx

Category : devii, kavacha, dashamahAvidyA, devI

Location : doc_devii

Proofread by : lalitha parameswari parameswari.lalitha at gmail.com

Description/comments : shAktapramodaH

Latest update : July 29, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 16, 2023

*sanskritdocuments.org*

# Matangini Kavacham

# मातङ्गिनीकवचम्

श्रीदेव्युवाच
साधु साधु महादेव कथयस्व सुरेश्वर ।
मातङ्गीकवचन्दिव्यं सर्वसिद्धिकरन्नृणाम् ॥ १॥

श्री ईश्वर उवाच
शृणु देवि प्रवक्ष्यामि मातङ्गीकवचं शुभम् ।
गोपनीयं महादेवि मौनी जापं समाचरेत् ॥ २॥

अस्य श्रीमातङ्गीकवचस्य दक्षिणामूर्तिर्ऋषिर्विराट्
छन्दो मातङ्गी देवता चतुर्वर्गसिद्धये विनियोगः ॥

ॐ शिरो मातङ्गिनी पातु भुवनेशी तु चक्षुषी ।
तोडला कर्णयुगलन्त्रिपुरा वदनं मम ॥ ३॥

पातु कण्ठे महामाया हृदि माहेश्वरी तथा ।
त्रिपुष्पा पार्श्वयोः पातु गुदे कामेश्वरी मम ॥ ४॥

ऊरुद्वये तथा चण्डी जङ्घयोश्च हरप्रिया ।
महामाया पादयुग्मे सर्वाङ्गेषु कुलेश्वरी ॥ ५॥

अङ्गम्प्रत्यङ्गकञ्चैव सदा रक्षतु वैष्णवी ।
ब्रह्मरन्ध्रे सदा रक्षेन्मातङ्गी नाम संस्थिता ॥ ६॥

ललाटे रक्षयेन्नित्यं महापिशाचिनीति च ।
नेत्राभ्यां सुमुखी रक्षेद्देवी रक्षतु नासिकाम् ॥ ७॥

महापिशाचिनी पायान्मुखे रक्षतु सर्वदा ।
लज्जा रक्षतु मान्दन्ते चोष्ठौ संमार्जनीकरी ॥ ८॥

चिबुके कण्ठदेशे तु चकारत्रितयम्पुनः ।
सविसर्गं महादेवी हृदयम्पातु सर्वदा ॥ ९॥

नाभिं रक्षतु मा लोला कालिकावतु लोचने ।
उदरे पातु चामुण्डा लिङ्गे कात्यायनी तथा ॥ १०॥

उग्रतारा गुदे पातु पादौ रक्षतु चाम्बिका ।
भुजौ रक्षतु शर्वाणी हृदयञ्चण्डभूषणा ॥ ११॥

जिह्वायां मातृका रक्षेत्पूर्वे रक्षतु पुष्टिका ।
विजया दक्षिणे पातु मेधा रक्षतु वारुणे ॥ १२॥

नैर्ऋत्यां सुदया रक्षेद्वायव्याम्पातु लक्ष्मणा ।
ऐशान्यां रक्षयेद्देवी मातङ्गी शुभकारिणी ॥ १३॥

रक्षेत्सुरेशा चाग्नेये बगला पातु चोत्तरे ।
ऊर्द्धम्पातु महादेवी देवानां हितकारिणी ॥ १४॥

पाताले पातु मा नित्यँ वशिनी विश्वरूपिणी ।
प्रणवञ्च तता माया कामबीजञ्च कूर्चकम् ॥ १५॥

मातङ्गिनी ङेयुतास्त्रँ वह्निजायावधिर्मनुः ।
सार्द्धैकादशवर्णा सा सर्वत्र पातु मां सदा ॥ १६॥

इति ते कथितन्देवि गुह्याद्गुह्यतरम्परम् ।
त्रैलोक्यमङ्गलन्नाम कवचन्देवदुर्लभम् ॥ १७॥

य इदम्प्रपठेन्नित्यञ्जायते सम्पदालयम् ।
परमैश्वर्यमतुलम्प्राप्नुयान्नात्र संशयः ॥ १८॥

गुरुमभ्यर्च्च्य विधिवत्कवचम्प्रपठेद्यदि ।
ऐश्वर्यं सुकवित्वञ्च वाक्सिद्धिं लभते ध्रुवम् ॥ १९॥

नित्यन्तस्य तु मातङ्गी महिला मङ्गलञ्चरेत् ।
ब्रह्मा विष्णुश्च रुद्रश्च ये देवाः सुरसत्तमाः ॥ २०॥

ब्रह्मराक्षसवेताला ग्रहाद्या भूतजातयः ।
तन्दृष्ट्वा साधकन्देवि लज्जायुक्ता भवन्ति ते ॥ २१॥

कवचन्धारयेद्यस्तु सर्वसिद्धिंलभेद्ध्रुवम् ।
राजानोऽपि च दासत्वं षट्कर्माणि च साधयेत् ॥ २२॥

सिद्धो भवति सर्वत्र किमन्यैर्बहु भाषितैः ।
इदं कवचमज्ञात्वा मातङ्गीँ यो भजेन्नरः ॥ २३॥

अल्पायुर्निर्द्धनो मूर्खो भवत्येव न संशयः ।
गुरौ भक्तिः सदा कार्या कवचे च दृढा मतिः ॥ २४॥

तस्मै मातङ्गिनी देवी सर्वसिद्धिम्प्रयच्छति ॥ २५॥

इति नन्द्यावर्ते उत्तरखण्डे त्वरितफलदायिनी मातङ्गिनीकवचं समाप्तम् ॥

Proofread by lalitha parameswari parameswari.lalitha at gmail.com

*Matangini Kavacham*

pdf was typeset on September 16, 2023

Please send corrections to *sanskrit@cheerful.com*